# द्वितीयः पाठः

# सुभाषितानि

[संस्कृत भाषा में सामान्य नीति पर बहुत बल दिया जाता है । नीति मानव को सत्पथ पर ले जाती है तथा निन्दित मार्ग से बचाती है । नीति से सम्बद्ध कई पद्यग्रन्थ संस्कृत वाङ्मय के रत्न हैं जैसे विदुरनीति, चाणक्यनीति तथा भर्तृहरि का नीतिशतक । इनके अतिरिक्त भी विभिन्न साहित्यिक ग्रन्थों में प्रयुक्त नीतिश्लोक संस्कृत विद्वानों की जिह्वा पर रहते हैं । कश्मीरी आचार्य क्षेमेन्द्र ने भी अपने काव्यग्रन्थों या व्यङ्ग्यपरक ग्रन्थों में मानव जीवन के संचालनार्थ, नीतिश्लोक प्रस्तुत किए हैं जो उन प्रसंगों से सम्बद्ध होने पर भी सार्वकालिक महत्त्व के हैं ।]




येषां न विद्या न तपो न दानं न चापि शीलं न गुणो न धर्मः ।
ते मर्त्यलोके भुवि भारभूता मनुष्यरूपेण मृगाश्चरन्ति ॥1॥

(चाणक्यनीति 10.7, नीतिशतक 13)

जलबिन्दुनिपातेन क्रमशः पूर्यते घटः ।
स हेतुः सर्वविद्यानां धर्मस्य च धनस्य च ॥2॥

(चाणक्यनीति 12.19)

दाने तपसि शौर्ये वा विज्ञाने विनये नये ।
विस्मयो न हि कर्तव्यो बहुरत्ना वसुन्धरा ॥3॥

(चाणक्यनीति 14.8)

अष्टौ गुणाः पुरुषं दीपयन्ति,
प्रज्ञा च कौल्यं च दमः श्रुतं च ।
पराक्रमश्चाबहुभाषिता च,
दानं यथाशक्ति कृतज्ञता च ॥4॥

(विदुरनीति 1.104)

जरा रूपं हरति धैर्यमाशा
मृत्युः प्राणान् धर्मचर्यामसूया ।
कामो ह्रियं वृत्तमनार्यसेवा
क्रोधः श्रियं सर्वमेवाभिमानः ॥5॥

(विदुरनीति 5.8)

अकीर्तिं विनयो हन्ति हन्त्यनर्थं पराक्रमः ।
हन्ति नित्यं क्षमा क्रोधमाचारो हन्त्यलक्षणम् ॥6॥

(विदुरनीति 7.42)

लोभश्चेदगुणेन किं, पिशुनता यद्यस्ति किं पातकैः,

सत्यं चेत्तपसा च किं, शुचि मनो यद्यस्ति तीर्थेन किम् ।

सौजन्यं यदि किं गुणैः, सुमहिमा यद्यस्ति किं मण्डनैः

सद्विद्या यदि किं धनैरपयशो यद्यस्ति किं मृत्युना ।।7।।

(नीतिशतकम् 55)

आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः ।

नास्त्युद्यमसमो बन्धुर्यं कृत्वा नावसीदति ।।8।।

(नीतिशतकम् 86)

## शब्दार्थाः

| | | |
|---|---|---|
| विद्या | = | शास्त्रज्ञान |
| तपः | = | तपस्या, साधना |
| ज्ञानम् | = | विवेक, अच्छे-बुरे को समझने की क्षमता |
| शीलम् | = | श्रेष्ठ स्वभाव, आदत |
| मर्त्यलोके | = | मानव जगत् में |
| भुवि | = | भूमि पर |
| भारभूताः | = | भारस्वरूप (बहुवचन), बोझ के रूप में |
| मृगाः | = | पशु, जानवर |
| निपातेन | = | गिराने से, डालने से |
| पूर्यते | = | भरा जाता है |

| | | |
|---|---|---|
| हेतुः | = | कारण, प्राप्ति की प्रक्रिया |
| शौर्ये | = | शूरता (वीरता) दिखाने में |
| विनये | = | विनम्रता के क्षेत्र में |
| नये | = | न्याय या नीति के विषय में |
| विस्मयः | = | आश्चर्य |
| कर्त्तव्यः | = | करना चाहिए, करें |
| बहुरत्ना | = | जिसमें अनेक (एक से बढ़कर एक) रत्न (नमूने) भरे हैं |
| वसुन्धरा | = | पृथ्वी |
| दीपयन्ति | = | प्रकाशित करते हैं, चमकाते हैं, श्रेष्ठ बनाते हैं |
| प्रज्ञा | = | बुद्धि |
| कौल्यम् | = | कुलीनता, अच्छे वंश का संस्कार होना |
| दमः | = | इन्द्रिय-संयम |
| श्रुतम् | = | शास्त्रज्ञान |
| पराक्रमः | = | शक्ति तथा उत्साह से कार्य-सम्पादन |
| अबहुभाषिता | = | अधिक न बोलना, मितभाषी होना |
| यथाशक्ति | = | अपनी शक्ति के अनुसार |
| कृतज्ञता | = | अपने प्रति हुए उपकार को स्मरण रखना |
| जरा | = | वृद्धावस्था, बुढ़ापा |

| | | |
|---|---|---|
| हरति | = | नष्ट करता है/करती है |
| धैर्यम् | = | धीरता को |
| आशा | = | प्रतीक्षा, उम्मीद |
| धर्मचर्याम् | = | धर्म के आचरण को |
| असूया | = | छिद्रान्वेषण, गुणों में दोष ढूँढ़ना |
| कामः | = | इच्छा, विषयासक्ति |
| ह्रियम् | = | लज्जा को |
| वृत्तम् | = | सदाचरण को, अच्छे कार्यों को |
| अनार्यसेवा | = | नीच पुरुषों की सेवा करना |
| श्रियम् | = | सम्पत्ति |
| अभिमानः | = | अहंकार, अपने को बड़ा मानना |
| अकीर्तिम् | = | अपयश को, लोकापवाद को |
| हन्त्यनर्थम् (हन्ति + अनर्थम्) | = | गड़बड़ी या उपद्रव को नष्ट कर देता है |
| नित्यम् | = | सदैव, हमेशा |
| आचारः | = | सदाचरण, नियमों के अनुकूल चलना |
| हन्त्यलक्षणम् (हन्ति + अलक्षणम्) | = | कुलक्षण समाप्त कर देता है |
| लोभश्चेत् (लोभः + चेत्) | = | यदि लोभ (लालच) दोष रहे |
| किम् | = | क्या आवश्यकता है, व्यर्थ है |
| पिशुनता | = | चुगली करने की प्रवृत्ति, निन्दा-वृत्ति |

पातकैः किम् = पापों की आवश्यकता क्या है

शुचि मनः = पवित्र चित्त, शुद्ध मन

यद्यस्ति (यदि + अस्ति) = यदि वर्तमान है

सौजन्यम् = सज्जनता

सुमहिमा = अच्छी कीर्ति, लोकप्रियता

मण्डनैः किम् = आभूषण धारण करने की क्या आवश्यकता है

शरीरस्थः = शरीर में रहने वाला, आन्तरिक

रिपुः = शत्रु, वैरी

नास्त्युद्यमसमः = उद्योग के समान नहीं है

(न+अस्ति+उद्यमसमः)

बन्धुः = मित्र, सम्बन्धी, परिवारजन

कृत्वा (कृ+क्त्वा) = करके

नावसीदति = दुःखी नहीं होता, पछतावा नहीं होता

(न+अवसीदति)

## व्याकरणम्

सन्धिः

चापि = च + अपि (दीर्घसन्धिः) ।

मृगाश्चरन्ति = मृगाः + चरन्ति (विसर्गसन्धिः)।

पराक्रमश्चाबहुभाषिता = पराक्रमः+च+अबहुभाषिता (विसर्गसन्धिः, दीर्घसन्धिः)

हन्त्यनर्थम् = हन्ति + अनर्थम् (यण्सन्धिः)

हन्त्यलक्षणम् = हन्ति + अलक्षणम् (यण्सन्धिः) ।

लोभश्चेदगुणेन = लोभः+चेत्+अगुणेन (विसर्गसन्धिः, व्यञ्जनसन्धिः)।

यद्यस्ति = यदि + अस्ति (यण्सन्धिः) ।

नास्त्युद्यमसमः = न+अस्ति (दीर्घसन्धिः)+उद्यमसमः (यण्सन्धिः)

बन्धुर्यम् = बन्धुः + यम् (विसर्गसन्धिः)

नावसीदति = न + अवसीदति (दीर्घसन्धिः)

**प्रकृति-प्रत्यय-विभागः**

कर्तव्यः = कृ + तव्य, पुं॰, एकवचनम् ।

हरति = √हृ + लट्लकारः, प्रथमपुरुषः, एकवचनम् ।

चरन्ति = √चर् + लट्लकारः, प्रथमपुरुषः, बहुवचनम् ।

कृत्वा = √कृ + क्त्वा ।

अस्ति = √अस् + लट्लकारः, प्रथमपुरुषः, एकवचनम् ।

हन्ति = √हन् + लट्लकारः, प्रथमपुरुषः, बहुवचनम् ।

अवसीदति = अव + √सद् लट्लकारः, प्रथमपुरुषः, एकवचनम् ।

दीपयन्ति = √दीप् + लट्लकारः, प्रथमपुरुषः, बहुवचनम् ।

**विभक्तिः**

**अगुणेन किम्** – किम् शब्द व्यर्थता या असाध्य होने की सूचना देता है, अतः इसके योग में तृतीया विभक्ति है । यदि किसी के पास लोभ की वृत्ति है तो किसी अन्य दोष (अगुण) की जरूरत नहीं । अन्य दोष व्यर्थ हैं । लोभ ही पर्याप्त है । इसी प्रकार पातकैः, तपसा, तीर्थेन, गुणैः, मण्डनैः, धनैः और मृत्युना में तृतीया विभक्ति का प्रयोग है ।

**पद्यानाम् अन्वयः**

1. येषां (जनानां) न विद्या (अस्ति), न तपः, न दानम् अपि च न शीलम् (अस्ति), न गुणः, न धर्मः (अस्ति), ते (जनाः) मर्त्यलोके भुवि भारभूताः (सन्ति), मनुष्यरूपेण मृगाः चरन्ति ।

2. जल-बिन्दु-निपातेन क्रमशः घटः पूर्यते । स हेतुः (क्रमः एव) सर्वविद्यानाम्, धर्मस्य, धनस्य च (विषये अस्ति) ।

3. दाने, तपसि, शौर्ये, विज्ञाने, विनये, नये वा विस्मयः न कर्तव्यः, हि (यतः) वसुन्धरा बहुरत्ना (अस्ति) ।

4. अष्टौ गुणाः पुरुषं दीपयन्ति – प्रज्ञा च, कौल्यं च, दमः, श्रुतं च, पराक्रमः च, अबहुभाषिता च, यथाशक्ति दानम्, कृतज्ञता च ।

5. जरा रूपं हरति, आशा धैर्यं (हरति), मृत्युः प्राणान् (हरति), असूया धर्मचर्यां (हरति), कामः ह्रियं (हरति), अनार्यसेवा वृत्तं (हरति), क्रोधः श्रियं (हरति), अभिमानः (तु) सर्वमेव (हरति) ।

6. विनयः अकीर्तिं हन्ति, पराक्रमः अनर्थम् (हन्ति), क्षमा नित्यं क्रोधम् (हन्ति),

आचारः अलक्षणम् (हन्ति) ।

7. लोभः चेत् अगुणेन किम् ? यदि पिशुनता अस्ति पातकैः किम् ? सत्यं च (अस्ति) चेत् तपसा किम् ? यदि मनः शुचि अस्ति (तदा) तीर्थेन किम् ? यदि सौजन्यम् (अस्ति तदा) गुणैः किम् ? यदि सुमहिमा अस्ति, (तदा) मण्डनैः किम् ? यदि सद्विद्या (अस्ति तदा) धनैः किम् ? यदि अपयशः अस्ति (तदा) मृत्युना किम् ?

8. आलस्यं हि मनुष्याणां शरीरस्थः महान् रिपुः (अस्ति) । उद्यमसमः बन्धुः न अस्ति, यम् (उद्यमम्) कृत्वा (मनुष्यः) न अवसीदति ।

## अभ्यासः

### मौखिकः

**1. अस्य पाठस्य कानिचन चत्वारि सुभाषितानि श्रावयत ।**

**2. निम्नलिखितानां पदानाम् अर्थं वदत -**

भुवि, दीपयन्ति, निपातेन, शीलम्, श्रियम्, रिपुः, पिशुनता, नित्यम्, यद्यस्ति, सुमहिमा

**3. सन्धिविच्छेदं वदत -**

चापि, यद्यस्ति, मृगाश्चरन्ति, बन्धुर्यम्, नावसीदति ।

**4. अधोलिखितेषु पदेषु मूलधातुं वदत -**

दीपयन्ति, हन्ति, अस्ति, अवसीदति, हरति ।

## लिखितः

1. 'क' स्तम्भस्य वाक्यानि 'ख' स्तम्भस्य वाक्यैः सह मेलयत -

| 'क' | 'ख' |
|---|---|
| (क) येषां न विद्या | (i) बहुरत्ना वसुन्धरा । |
| (ख) आलस्यं हि मनुष्याणां | (ii) क्रोधमाचारो हन्त्यलक्षणम् । |
| (ग) हन्ति नित्यं क्षमा | (iii) शरीरस्थो महान् रिपुः । |
| (घ) विस्मयो न हि कर्तव्यो | (iv) धर्मस्य च धनस्य च । |
| (ङ) स हेतुः सर्वविद्यानां | (v) न तपो न दानम् । |

2. पाठं पठित्वा रिक्तस्थानानि पूरयत -

(क) ...................... गुणाः पुरुषं दीपयन्ति ।

(ख) मृत्युः .......................... धर्मचर्यामसूया ।

(ग) ते मर्त्यलोके भुवि .......................... ।

(घ) मनुष्याणां शरीरस्थो .................... रिपुः ।

(ङ) अकीर्तिं ......................... हन्ति ।

3. एकपदेन उत्तरत -

(क) विद्यादिरहिताः जनाः भुवि कीदृशाः ?

(ख) मनुष्याणां शरीरस्थो महान् रिपुः कः ?

(ग) कति गुणाः पुरुषं दीपयन्ति ?

(घ) बहुरत्ना का वर्तते ?

(ङ) उद्यमसमः कः न अस्ति ?

4. पाठानुसारेण सत्यम् (√) असत्यं (×) वा निर्दिशत -

(क) अष्टगुणाः पुरुषं दीपयन्ति । ( )

(ख) जरा रूपं हरति । ( )

(ग) अनार्यसेवा वृत्तं हरति । ( )

(घ) मृत्युः प्राणान् न हरति । ( )

(ङ) मनुष्यरूपेण अश्वाः चरन्ति । ( )

5. अधोलिखितानां पदानां विभक्तिनिर्णयं कुरुत -

येषाम्, गुणेन, धनैः, तपसि, भारभूताः, प्रज्ञा, दानम्, क्रोधः

6. निम्नलिखितानां शब्दानां प्रयोगेण संस्कृतभाषायां वाक्यनिर्माणं कुरुत -

यदि, क्षमा, पराक्रमः, विनयः, आलस्यम्, महान्, पुरुषाः

7. प्रकृति-प्रत्यय-विभागं कुरुत -

चरन्ति, हन्ति, दीपयन्ति, हरति, अस्ति

## योग्यता-विस्तारः

यद्यपि सभी भाषाओं में गद्यपद्यमय सुभाषित वाक्य प्राप्त होते हैं तथापि संस्कृत भाषा इस क्षेत्र में विलक्षण है । एक तो यहाँ सभी सुभाषित श्लोकरूप या श्लोकांशरूप हैं और दूसरे, जीवन के व्यापक क्षेत्र का दिग्दर्शन कराते हैं । पद्यात्मक होने से इन्हें स्मरण रखना सरल है तथा उचित अवसर पर इनकी प्रस्तुति अत्यधिक आकर्षक होती है । जीवन का ऐसा कोई क्षेत्र नहीं जिस पर संस्कृत कवियों की दृष्टि नहीं गयी है । सुभाषितों का संकलन भी बहुत प्राचीन समय से संस्कृत में होता रहा है । सुभाषितरत्नभाण्डागार नामक आधुनिक संकलन बहुत लोकप्रिय है जिसमें दस हजार से अधिक सुभाषित श्लोक तथा हजारों सूक्तियाँ भी संकलित हैं । इसी प्रकार सूक्तिमुक्तावली, सुभाषितरत्नकोश, शाङ्र्गधरपद्धति आदि प्राचीन सुभाषितसंग्रह भी प्रकाशित हैं । पञ्चतन्त्र, हितोपदेश जैसे कथाग्रन्थों में एवं संस्कृत महाकाव्यों में भी बहुत से सुभाषित विभिन्न पात्रों के द्वारा कहे गये हैं ।

• • •